(1358) "रक आस्वादने" (X-चुरादिः-1737. सक. सेट्. उभ.)

'—आसादने' इति दुर्गसम्मतपाठ इति क्षीरतरङ्गिणीतो ज्ञायते। [1]क्षीरस्वामी 'रग—' इति पठति। 'रघ—' इति केचित् पठन्ति। राककः-किका, रिराकयिषकः-षिका; राकयिता-त्री, रिराकयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककाणयतिवत् (159) ज्ञेयानि। [A]राकितः।

(1359) "रक्ष पालने" (I-भ्वादिः-658. सक. सेट्. पर.)

रक्षकः-क्षिका, रक्षकः-क्षिका, रिरक्षिषकः-षिका, ररक्षकः-क्षिका; रक्षिता-त्री, रक्षयिता-त्री, रिरक्षिषिता-त्री, ररक्षिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि भौवादिकतक्षतिवत् (691) ज्ञेयानि। [2]निरक्षी, [3]प्रतिहाररक्षी,[B] [4]रक्षणः,[C] रक्षणः, [5]रक्षः-राक्षसः, [6]रक्षिता,

---

1. क्षीरस्वामी 'रग—' इति पठित्वा "अन्यत्रार्थे घटादिः—रगे शङ्कायाम्... रगयति।" इत्याह। तेन घटादिषु (भ्वादौ) 'रगे शङ्कायाम्' इति यत्सर्वैः पठयते, तस्यार्थविशेषप्रयुक्तं घटादिपाठं मन्वानः, चौरादिकत्वमप्यङ्गीकरोतीति ज्ञायते।
2. 'रक्षश्रुवसवपशां नौ' (ग. सू. 3-1-134) इति ग्रह्यादिषु वचनात् कर्तरि निपूर्वकादस्माण्णिनिः।
3. प्रतिहारं=गृहाङ्कणदेशविशेषं रक्षतीति प्रतिहाररक्षी। 'कर्मण्यण्' (3-2-1) इत्यण्प्रत्यये स्त्रियाम् अणन्तलक्षणे ङीपि रूपमेवम्।
4. 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (3-3-90) इति भावे नङ्प्रत्ययः। 'नेड् वशि कृति' (7-2-8) इतीणिनषेधः।
5. 'असुन्' [द. उ. 9-49] इत्यसुन्प्रत्यये रूपम्। रक्ष एव राक्षसः। प्रज्ञादित्वात् स्वार्थेऽण्प्रत्ययः। अत्रेदमवधेयम्। 'पाणिनीयधातुपाठसमीक्षा' नामके नव्यग्रन्थे ऋग्वेदे (10-68-1) प्रयुक्तं 'रक्षमाणाः' इति पदमुपादाय 'वेगवदुत्पतने (धातोः) वृत्तिः।' इत्युक्तम्। तदनुसारेणात्र रक्षोराक्षसशब्दयोरपि पालनार्थे वृत्तिर्न, अपि तु वेगवदुत्पतने वृत्तिरिति भाति। शांखायनारण्यके (7-20) 'रक्षते' इति प्रयुक्तत्वात्, प्रकृतऋङ्मन्त्रेऽपि रक्षमाणाः इति शानजन्तत्वेन प्रयोगाच्च धातोरस्य क्वचित् वेदे उभयपदित्वमपि भवतीति ज्ञायते।
6. ताच्छील्ये 'तृन्' (3-2-135) इति तृन्।

A. 'कृष्णोऽपि नाकिजनराकितलाग्यवीर्यः॥' धा. का. 3-41.
B. 'ततो नृपाणां श्रुतवंशवृत्ता पुंवत्प्रगल्भा प्रतिहाररक्षी।' रघु. 6.20.
C. 'रक्षणं करोषि कस्मात् त्वं यत्नेनाख्यायतां शुभे।' भ. का. 7.66.